# shrIviShNoraShTAvinshatinAmastotram

# શ્રીવિષ્ણોરષ્ટાવિંશતિનામસ્તોત્રમ્

## Document Information

Text title : viShNoraShTAvi.nshatinAmastotram

File name : vishhnu28.itx

Category : vishhnu, stotra, vishnu, viMshati

Location : doc_vishhnu

Author : Traditional

Transliterated by : http://www.webdunia.com

Proofread by : Kirk Wortman kirkwort at hotmail.com

Latest update : January 13, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણોરષ્ટાવિંશતિનામસ્તોત્રમ્

અર્જુન ઉવાચ
કિં નુ નામ સહસ્રાણિ જપતે ચ પુનઃ પુનઃ ।
યાનિ નામાનિ દિવ્યાનિ તાનિ ચાચક્ષ્વ કેશવ ॥ ૧॥

શ્રીભગવાનુવાચ
મત્સ્યં કૂર્મં વરાહં ચ વામનં ચ જનાર્દનમ્ ।
ગોવિન્દં પુણ્ડરીકાક્ષં માધવં મધુસૂદનમ્ ॥ ૨॥

પદ્મનાભં સહસ્રાક્ષં વનમાલિં હલાયુધમ્ ।
ગોવર્ધનં હૃષીકેશં વૈકુણ્ઠં પુરુષોત્તમમ્ ॥ ૩॥

વિશ્વરૂપં વાસુદેવં રામં નારાયણં હરિમ્ ।
દામોદરં શ્રીધરં ચ વેદાઙ્ગં ગરુડધ્વજમ્ ॥ ૪॥

અનન્તં કૃષ્ણગોપાલં જપતો નાસ્તિ પાતકમ્ ।
ગવાં કોટિપ્રદાનસ્ય અશ્વમેધશતસ્ય ચ ॥ ૫॥

કન્યાદાનસહસ્રાણાં ફલં પ્રાપ્નોતિ માનવઃ ।
અમાયાં વા પૌર્ણમાસ્યામેકાદશ્યાં તથૈવ ચ ॥ ૬॥

સન્ધ્યાકાલે સ્મરેન્નિત્યં પ્રાતઃકાલે તથૈવ ચ ।
મધ્યાહ્ને ચ જપન્નિત્યં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૭॥

। ઇતિ શ્રીકૃષ્ણાર્જુનસંવાદે શ્રીવિષ્ણોરષ્ટાવિંશતિનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Visit http://www.webdunia.com for additional texts with Hindi meanings.

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*